## मम्मटानुसारेण काव्यस्य प्रयोजनानि निरूप्यन्ताम्।

काव्यप्रकाशे प्रथमोल्लासे मम्मटेन काव्यस्य प्रयोजनं निरूपितम्। यमर्थम् अधिकृत्य प्रवर्तते जन: तत् प्रयोजनम् उच्यते तथा च लोकोक्तिरियं प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते इति।

भारतीयशास्त्रकारा: ग्रन्थादौ ग्रन्थस्य विषयान् तथा ग्रन्थपाठस्य प्रयोजनमपि ज्ञापयन्ति। अलंकारशास्त्रेऽपि सा रीति: प्रचलिता। किन्तु तत्र लक्ष्यवस्तुन: काव्यस्यैव प्रयोजजम् उक्तं वाहुल्येन। मम्मटेनापि ग्रन्थादौ काव्यस्य प्रयोजनमुक्तं —

काव्य यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्य: परनिर्वतृये कान्तासम्मितत‌योपदेशयुजे।। इति।

अस्मिन् काव्यप्रयोजवचने मम्मटेन षट् प्रयोजनानि उक्तानि प्राचीनपरम्परानुसारेण। तानि हि यश:, अर्थ:, व्यवहारज्ञानम्, अमङ्गलनाश:, सद्य: परमानन्दलाभ: कोमलभाषया उपदेशलाभश्चेति। एतेषु षट्सु सद्य: परनिर्वृतिस्तथा शिवेतरक्षति: इति द्वयमेव मुख्यप्रयोजनम् वोद्धव्यम्।

**यशसे** – सर्वजनमनोरञ्जकाव्यं विरचय्य प्राप्नुवन्ति कवय: विमलं यश:, कविसंसारे सर्वजनविदितस्य कालिदासस्य तथा तदनन्तरं सम्भूतानां दण्डिभारविमाघादीनां काव्यानि भृशं पठित्वा पाठका: समर्पयन्ति प्रशंसाम् तेभ्य:। अत: काव्यं यशोलाभाय इत्युक्तम्।

**अर्थकृते** – करोतीति कृत्, कृ + क्विप् अर्थस्य कृत् अर्थकृत्, तस्मै अर्थकृते, अर्थात् धनलाभाय इति। न केवलमिदं यश: अपि तु काव्यनिर्माणेन काव्यकर्त्तार: लभन्ते अर्थमजस्त्रम्। प्रवादो वर्त्तते पुरा धावकनामा महाकवि: रत्नावलीनाटिकां श्रीहर्षनाम्ना विलिख्य लेभे बहुनि घनानि। भारविरपि ‘सहसा विदधीत न कियाम्’ इति माघोऽपि च ‘कुमुदवनमपश्री’ (माघ एकादशसर्गस्य श्लोकं) इति विलिख्य बहुमर्थराशिं प्राप्तवान्। अधुना अपि साहित्यिका ग्रन्थान् विलिख्य साहित्यएकाडेमीपक्षत: राष्ट्रपतिसकाशात् च आसादयन्ति अर्थेन साकं प्रशंसापत्रम्। पुरीनगरे ‘सुनिआ’ इति पर्वदिने मठाधीशा: श्लोकरचयितृभ्य: अर्थ ददति। रवीन्द्रनाथठाकुरोऽपि स्वगीताञ्जलिसकाशात् ‘नोवेल्’ पुरस्कारं लब्धवान्। अत: काव्यम् अर्थागमनाय यशोलाभाय च।

**व्यवहारविदे –** व्यवहारस्य वित्, तस्यै व्यवहारविदे व्यवहारज्ञानाय इत्यर्थ:। राज्ञि कथं व्यवहरणीयं मुनिसचिवेषु कथम् आचरणीयमिति काव्यानुशीलनेन साम्यक् ज्ञायते। काव्यनाटकादिषु पात्राणाम् आलापात् व्यवहारज्ञानं ते इति तात्पर्यम्। अत: काव्यं व्यवहारज्ञानाय अलं भवति।

**शिवेतरक्षतये –** शिवं नाम मङ्गलं, तत: इतरम् इति शिवेतरम्, जनङ्गलमित्यर्थ:। तस्यामङ्गलस्य क्षतये विनाशाय काव्यमुद्दिष्टम्। काव्यद्वारेण अमङ्गलस्य विनाशे जायते। एतदपि महामान्य: मम्मट: प्रतिपादयति यत् – पुरा मयूरनामा महाकवि-रासीत्। स: भगिनि अभिशप्त: सन् कुष्टरोगेण पीडित: अभवत्। गङ्गाकूले सूर्यशतकं रचयित्वा तस्मात् दु:साधरोगात् मुक्त: जात:। अधुना अपि जना: अमङ्गलनाशाय धर्मपुस्तकापाठं कुर्वन्ति। अस्मात् कारणात् काव्यं शिवेतरक्षतये इति यदुक्तं तत् समीचीनम्।

**सद्य: परनिर्वृत्तये –** यदि केनचित् वृक्षरोपणं विधीयते वा क्रियते यागादिकार्यं तर्हि विलम्बेन तत्फलमासाद्यते तेन। परन्तु काव्यश्रवणात्परम् अथवा दृश्यकाव्यदर्शनात्परं जना: प्राप्नुवन्ति अपारमानन्दम्। अत्र सहृदया: प्रमाणम्। यत: ते मधुरकाव्यश्रवणेन नाटकदर्शनेन च द्रवीभूतहृदया: भवन्ति। काव्यस्य प्रयोजनविषये 'सद्य: परिनिर्वृत्यते' इति मम्मटमतम् अस्मात् सुसङ्गतम्।

**कान्ता सम्मिततया उपदेशयुजे –** एष काव्यास्वादजनित आनन्द: वेद्यान्तरस्पर्शशून्य: व्रष्मास्वादसहोदर:। काव्यस्य षष्ठं प्रयोजनं हि कान्तसम्मिततया उपदेशदानम्। उपदेशो हि हितकरे कर्मणि प्रवर्तकं वाक्यम् तथा अहितकरात् कर्मण: निवर्तकं वाक्यम्। वेदा: प्रभुसम्मिततया पुराणदय: वन्धुसम्मिततया उपदेशं ददति। किन्तु काव्यं कान्ता इव सरसताम् आपदायात् कोमलतया उपदेशं ददाति। यथा रामायणमुपदिशति रामादिवद् वर्तितव्यं न रावणादिवदिति।

ऐतेषु षट्सु प्रयोजनेषु यश: अर्थ: अमङ्गलनाशश्च एतत्त्रयं कवे: सहृदयस्य च लभ्यम्। किन्तु व्यवहारज्ञानं तथा कान्तासम्मितोपदेशलाभ: केवलं पाठकस्यैव प्राप्यम्। आनन्दलाभस्तु कवे: सहृदयस्य च उभयोरेव प्रयोजनम्।

वस्तुतस्तु शिल्पकलाया: किमपि प्रयोजनं न विद्यते। शिल्पमेव शिल्पस्य प्रयोजनम् (Art for Arts Sake) इति युक्त्या काव्यस्यापि प्रयोजनान्वेषणम् अर्थहीनं स्यात्। लोककल्याणमपि शिल्पस्य कर्तव्यम् इति न वक्तव्यम्। तदानीं शिल्पस्य स्वत:स्फूर्तता विनश्येत् कृत्रिमता च तं ग्रसेत।

एतत्प्रयोजनसम्मिलितं काव्यं कथं नानुसर्तव्यम्? काव्यप्रकासस्य विमर्शकारस्य सूर्यमणे: मम मतानुसारं काव्यस्य प्रयोजमिदं यत् –

असारे खलु कियद्दिनं जिजीविषु:।
प्रशंसितो भवेल्लोकै: काव्ययोगादिहापि ना।।

भामहमतेन काव्यस्य प्रयोजनं यथा –

धर्मार्थकाममोक्षेषु वैचक्ष्यण्यं कलासु च।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम्।।

विश्वनाथानुसारं काव्यस्य प्रयोजनं यथा –

चतुर्वर्गफलप्राप्ति: सुखादल्पधियामपि।
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते।। इति विस्तरेणालम्।